# Sitaya Kritam Agni Stotram or Vahnya Ashtakam

# સીતાયા કૃતં અગ્નિસ્તોત્રં અથવા વહ્ન્યષ્ટકમ્

## Document Information

Text title : Sitaya Kritam Agni Stotram or Vahnya Ashtakam

File name : sItAyAkRRitaMagnistotraM.itx

Category : deities_misc, aShTaka, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : from Kurmapurana, kUrmapurANe uttarabhAge 34/116-124

Latest update : August 13, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 13, 2022

*sanskritdocuments.org*

Sitaya Kritam Agni Stotram or Vahnya Ashtakam

# સીતાયા કૃતં અગ્નિસ્તોત્રં અથવા વહ્ન્યષ્ટકમ્

સીતા ઉવાચ -
ઉપતસ્થે મહાયોગં સર્વદોષવિનાશનમ્ ।
કૃતાઞ્જલી રામપત્ની સાક્ષાત્પતિમિવાચ્યુતમ્ ॥ ૧॥

નમસ્યામિ મહાયોગં કૃતાન્તં ગહનં પરમ્ ।
દાહકં સર્વભૂતાનામીશાનં કાલરૂપિણમ્ ॥ ૨॥

નમસ્યે પાવકં દેવં શાશ્વતં વિશ્વતોમુખમ્ ।
યોગિનં કૃત્તિવસનં ભૂતેશં પરમમ્પદમ્ ॥ ૩॥

આત્માનં દીપ્તવપુષં સર્વભૂતહૃદિ સ્થિતમ્ ।
તં પ્રપદ્યે જગન્મૂર્ત્તિં પ્રભવં સર્વતેજસામ્ ।
મહાયોગેશ્વરં વહ્નિમાદિત્યં પરમેષ્ઠિનમ્ ॥ ૪॥

પ્રપદ્યે શરણં રુદ્રં મહાગ્રાસં ત્રિશૂલિનમ્ ।
કાલાગ્નિં યોગિનામીશં ભોગમોક્ષફલપ્રદમ્ ॥ ૫॥

પ્રપદ્યે ત્વાં વિરૂપાક્ષં ભૂર્ભુવઃસ્વઃસ્વરૂપિણમ્ ।
હિરણ્યમયે ગૃહે ગુપ્તં મહાન્તમમિતૌજસમ્ ॥ ૬॥

વૈશ્વાનરં પ્રપદ્યેઽહં સર્વભૂતેષ્વવસ્થિતમ્ ।
હવ્યકવ્યવહં દેવં પ્રપદ્યે વહ્નિમીશ્વરમ્ ॥ ૭॥

પ્રપદ્યે તત્પરં તત્ત્વં વરેણ્યં સવિતુઃ શિવમ્ ।
ભાર્ગવાગ્નિપરં જ્યોતિઃ રક્ષ માં હવ્યવાહન ॥ ૮॥

ઇતિ વહ્ન્યષ્ટકં જપ્ત્વા રામપત્ની યશસ્વિની ।
ધ્યાયન્તી મનસા તસ્થૌ રામમુન્મીલિતેક્ષણા ॥ ૯॥

ઇતિ કૂર્મપુરાણે પૂર્વભાગે ચતુસ્ત્રિંશાધ્યાયાન્તર્ગતં
સીતાયા કૃતં અગ્નિસ્તોત્રં અથવા વહ્ન્યષ્ટકં સમાપ્તમ્ ।

કૂર્મપુરાણે ઉત્તરભાગે ૩૪/૧૧૬-૧૨૪

Proofread by PSA Easwaran

*Sitaya Kritam Agni Stotram or Vahnya Ashtakam*

pdf was typeset on August 13, 2022

Please send corrections to *sanskrit@cheerful.com*